This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012
Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M652 विषय युधाविरा.
नाव. लिंगपुराण MSS.
लेखक/लिपीकार रामनाथ (लिपिक).
पृष्ठ 10 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथलिंगप्रतिष्ठाप्रारंभः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥अथबोधायनोक्तलिंगप्रतिष्ठाविधिः॥तत्राहोकालः॥विष्णुधर्मोत्तरे॥चैत्रेवाफाल्गुनेवापि त्रैवा माधवेतथा॥माघेवासर्वदेवानांप्रतिष्ठाशुभदाभवेत्॥१॥माधवीये शास्त्रे॥माघोत्रशिवाहिप्रतिष्ठापरः॥विष्णु प्रतिष्ठातुमाघेनभवति माघेकर्त्तुर्विनाशःस्यात्फाल्गुनेशुभदास्मृते॥इतिविष्णुप्रतिष्ठाप्रकरणेउक्तत्वाद्धेमाद्रिः॥मा घपक्षंशुभंशुक्लंआगतेद्वीचतुरायणे॥त्रिथिकृमस्तु॥कृष्णपक्षेतुत्रिभागस्तुप्रथमेस्याच्छुभावहा॥अस्याद्वितीयभागे तुरटनीयेकर्त्तुनाशिनी॥१॥शुक्लेत्रिभागेप्रथमेदेशनाशायकीर्त्तिता॥द्वितीयेमध्यकलहादरटनीयेतुशुभावहा॥२॥माघ्ये॥ पंचमीचद्वितीयाचदशमीयासप्तमीतथा॥एकादशीत्रयोदशी १ आसुप्रतिष्ठाविधिवत्कृता बहुफलाभवेत्॥आषाढेतथाश्रुलपुनरात्रयमेवच॥२॥श्रेष्ठाश्रवणरोहिण्यःपूर्वाभाद्रपदातथा॥हस्ताश्विनी रेवतीचपुष्योत्तरात्रिशिरस्तथा॥३॥अनुराधातथास्वातीप्रतिष्ठायांविशिष्यते॥बुधोबृहस्पतिःशुक्रोवारा एते शुभावहाः॥४॥उक्तंच॥हरौसुतेनकर्त्तव्यंदेवानांस्थापनंबुधैः॥कर्त्तव्यंचप्रबुधेतुहंसेवाप्युत्तरंगते॥५॥वि र्जयेत्सर्वयत्नेनमंत्रनिर्दलिणायने॥शुक्लेकृष्णेविशेषेणस्थापनंफलदंभवेत्॥२॥देवीपुराणे॥सिंहसंस्थेगुरौशु क्रेमकरेचवृषेतथा॥प्रारंभंनैवकुर्वीतमहादेवेचकारयेत्॥१॥पुत्रेभ्रातृफलंहन्याद्धनेसंशयः॥कार

कोव्रजतेनाशंसंततिःक्षियतेऽचिरात्॥२॥देवागमनउद्यमेशुभेजोत्थानएवशुच॥सिंहस्थंचकरस्थंचगुरुंयत्नेन वर्जयेत्॥३॥सर्वेषांचैवदेवानांआगमेचोत्तरायणे॥स्थापनंशुभदंप्रोक्तंअन्येषांदक्षिणायने॥४॥मात्तभैरवयो राद्यनारसिंहत्रिविक्रमाः॥महिषासुरहंसाश्चप्रतिष्ठादक्षिणायने॥५॥स्थापनंतुप्रकर्त्तव्यंशिशिरेहेमऋतुत्र येशाद्यद्विस्थापितंसिद्धेभवेच्छरदियोगदं॥६॥हेमंतेज्ञानदंलिंगंशिशिरेसर्वकामदं॥लक्ष्मीप्रदंवसंतेतुग्री ष्मेतुजयावसिद्धिदं॥७॥यतीनांसर्वकालेषुलिंगस्यारोपणंमतं॥८॥इतिशिवप्रतिष्ठाकालादिनिर्णयः॥

५ लिंग

अथमंत्रप्रतिष्ठाप्रयोगः॥तत्रपूर्वेद्युःब्राह्मणानामृत्विजांवृत्वा॥घृष्ट्वाघृष्ट्वाकरौपादौमृत्तिकांगोमयंजलं॥ श्रीविश्वेश्वरप्रीत्यर्थंलिंगप्रतिष्ठांकरिष्ये॥गणेशपूजनादिनांदीश्राद्धांतंकृत्वाऽचार्यस्त्वरयात्॥यथा चतुर्थ॥एवंसदस्यंगणपसंकल्पिजांश्चरणयात्॥अस्यागस्यनिष्पतोभवंतोभ्यर्चिनामया॥सुप्र सन्नाःप्रकुर्वंतुप्रतिष्ठांविधिपूर्वकां॥ततआचार्यःपरत्रसं॥शुचीनोहंसासरतःशुचीनांशुचिंहिनोम्य धरंशुचिभ्यः॥ऋतेनसत्यमृतसापऽआयन्शुचिजन्मानःशुचयःपावकाः॥१॥ततःप्रासादंगत्वाआपो

आचार्यस्त्वरयंबंधलालं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ हिशेत्रितिस्थानिः पंचगर्भेनकुर्शेः प्रासादंसंप्रोक्ष्यपरत्रसं॰अपक्रामंतुभूतानिनिष्ठाभ्यांगौसर्षपान्विकीर्यभूमोप्रा
देशंकृत्वादेवाआयांतुयानुधानाअपयांतुविक्षोरेवयजनंरक्षोनिरस्तांकृत्वावास्तुमंडलमेसदेशकालादिसंकी
र्त्यलिंगप्रतिष्ठांगभूतंवास्तुमंडलदेवतास्थापनंपूजनंचकरिष्ये॥इतिसंकल्प्यवास्तुमंडलेशानादिकोणचतुर्के
शंकुरोपणंकुर्यात्॥त्रिविधंतुभूतलेनागलोकपातालाश्चसर्वशः॥अस्मिन्प्रासादेवसंतुआसुर्बलकराःसदा॥१॥
तेभ्योबलिंदद्यात्॥अग्निभ्योव्यंतसर्पेभ्योयेचान्येतत्समाश्रिताः॥तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तमं॥२॥
पंचकमेणबलिंदद्यात्॥वस्त्रेसुवर्णशलाकयाकोरेखांकुर्यात्॥शांतायैनमः१यशोवत्यैनमः॥२॥कांतायै॰३विशा
लायै॰४पाणिनाहिन्यैनमः५सत्यै॰६सुमत्यै॰७नंदायै॰८सुभद्रायै॰९॥प्रागायतानवरेखाःकृत्वा॥हिरण्यायै॰१
सुप्रभायै॰२लक्ष्म्यै३विभूत्यै॰४विमलायै॰५प्रियायै॰६जयायै॰७कालायै॰८विशोकायै॰९तदहिर्भागेत्रयायताः
कृत्वा॥ततोवास्तुमंडलदेवतापूजनं॥ॐईशान्यैअर्द्धपरेशिखिनेनमः॥१तदहिर्गार्द्धपरेपर्जन्यायै॰२तदहि
र्लोकपरेजयंतायनमः॥३॥तदहिर्भोकपरेइंद्रायै॰४तदहिर्भौपरेसूर्यायै॰५तदहिर्भोपरेसत्यायै॰६तदहि

र्भौकपरेभृशायनमः॥७॥तदहिर्भौकपरेअंतरिक्षायै॰८॥तदहिर्गार्द्धपरेअनलायैनमः॥९॥तत्पश्चिमार्द्धप
रेपूषणे॰१०॥तत्पश्चिमैकपरेवितथायै॰११॥तत्पश्चिमैकपरेयमायै॰१२॥तत्पश्चिमैकपरेगंधर्वायै॰१३॥त
त्पश्चिमैकपरेभृंगराजायै॰१४॥तत्पश्चिमैकपरेमृगायै॰१५॥तत्पश्चिमार्द्धपरेपित्रेभ्योनमः॥१६॥तदुत्तरा
र्द्धपरेदौवारिकायनमः॥१७॥तदुत्तरैकपरेसुग्रीवायनमः॥१८॥तदुत्तरैकपरेपुष्पदंतायनमः॥१९॥
तदुत्तरैकपरेवरुणायनमः॥२०॥तदुत्तरैकपरेअसुरायै॰२१॥तदुत्तरैकपरेशोषायै॰२२॥तदुत्तरैकपरेपापा
यै॰२३॥तदुत्तरार्द्धपरेनागायैरोगायै॰२४॥तत्पूर्वार्द्धपरेअहये॰२५॥तत्पूर्वैकपरेमल्लायै॰२६॥तत्पूर्वैक
परेसोमायै॰२७॥तत्पूर्वैकपरेसर्पेभ्यो॰२८॥तत्पूर्वैकपरेअदितये॰३०॥तत्पूर्वैकपरेदितये॰३१॥
तदहिर्भैकपरेपश्चिमपरेचआपवत्साय॰३२॥तदहिर्भपरदक्षेआपवत्साय॰३३॥तदहिर्भपरचतुर्थे
अर्यम्णे॰३४॥तदहिर्भपरंदुर्येसवित्रे॰३५॥तदहिर्भपरदुर्येसवित्रायै॰३६॥तत्पश्चिमपरदुर्ये
तदुत्तरपरदुर्येचविवस्वते॰३७॥तत्पश्चिमपरदुर्येविबुधायै॰३८॥तत्पश्चिमपरदुर्येजयायै॰३९॥ पिपत्त१

५ तत्पूर्वैकपरेमुख्यायै॰२६।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदुत्तरपरद्वयेनपूर्वपरद्वयेचमिश्राय०॥४०॥तदुत्तरपरद्वयेराजयक्ष्मणे०॥४१॥तदुत्तरपरद्वयेरुद्राय०॥४२॥
तत्पूर्वपरद्वयेनदक्षिणपरद्वयेचपृथ्वीधराय०॥४३॥तभ्येचतुर्थ्यन्तेब्रह्मणे०॥४४॥बाधेविघ्नेश्वरेभ्यो०॥४५॥
॥ॐ॥विघ्नराजाय०२पूतनायै०३पापराक्षस्यै०५चतुर्हिङ्कारायै०७अर्यम्णे०८संभवकाय०९धिलिधिपाय०१०।
ततोलोकपालानाबाह्यावाहनोपचारैःपूजयेत्॥ततःप्रार्थयेत्॥०यथामेरुगिरेःशृंगंदेवानामालय
यःसदाततथाब्रह्माहेवानांसमयत्नेस्थिरोभव॥१॥तदीशान्यांकलशंसंस्थाप्यपूजयेत्॥ततःचरुक्याहीनांपा
यसबलिंमाषसक्तबलिंवाहरेत्॥ततोग्निंस्थापयित्वाग्रहणाबाह्यसंभवज्यग्रहकलशंप्रतिष्ठाप्यअ
न्वाधानंकुर्यात्॥चक्षुषीआज्येनेत्यंतमुक्त्वाशिष्याहिदेवताः॥प्रत्येकंअष्टचतुर्वारंसंख्याभिःसमिच्चि
त्तपायसाज्याहुतिभिः॥वास्तुनावास्तोष्पतइतिचतसृभिःऋग्भिःक्रमेणअष्टशतसंख्याभिःसमिच्चिल
पायसैर्बिल्वखंडैर्वातरभावेआज्येनवातथानवग्रहान्अधिदेवताप्रत्यधिदेवताश्चलोकपालदशादि
क्पालसहितान्क्रमेणाअष्टचतुर्द्विसंख्याभिःतत्तंत्रेनवाहुतिभिराज्येन॥पूर्णाहुत्यंतंकृत्वा।मासादंस

स्थपतये विघ्नेश्व

स्कुर्यात्॥राक्षोघ्नेनऋगुषघातइतिसूक्तेनपावमानेनघृतंधिसूत्रावेष्टयेत्॥दुग्धधारासुदक
धारांचकुर्यात्॥विसर्जनांतंकृत्वा॥ततःघागमंडपस्यआचार्यःनिशायांपंचगव्येनहिरण्य
पूर्णकुरवाबाह्यस्वपालाश्वपर्णमिश्रोदकेनलिंगमभिषिंच्य॥आपोहिष्ठा०३हिरण्यवर्णाः
शुचयःपावकाःसुजातःकश्यपोयास्त्विंद्रः॥अग्नियोगर्भंदधिरेविरूपास्तानआपश्शंस्योनाभ
वंतु॥१॥यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां॥मधुश्चुतःशुचयोयाःपावका
स्तानआ०२यासांदेवाःदिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति॥याःपृथिवींपयसोदन्ति
शुक्रास्तानःआ०३शिवेनमाचक्षुषापश्यताप्शिवयातनुवोपस्पृशत्वचंमे॥सर्वाग्नीन्अग्निंरप्सु
परोहुवेवोमधिवर्चोबलमोजोनिधत्तः॥४॥पवमानःसुवर्जनः॥पवित्रेणविचर्षणिः॥यःपोतास
पुनातुमा॥पुनंतुमादेवजनाःपुनंतुमनसोधियः॥पुनंतुविश्वआयवः॥जातवेदःपवित्रवत्॥पवित्रेण
पुनीहिमाशुक्रेणदेवदीद्यत्॥अग्नेक्रत्वाक्रतूंरनु॥यत्तेपवित्रमर्चिष्यग्नेतनूंतनं॥ब्रह्मणेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनीमहे॥उभाभ्यांदेवसवितः॥पवित्रेणसवेनच॥इदंब्रह्मपुनीमहे॥वैश्वदेवीपुनतीदेव्याधिय्येव
कीस्तनुवोवीनप्रुषः॥तयामदंतःसधमाद्येषु॥वयंस्याम्पतयोरयीणां॥वैश्वानरोरश्मिभिर्मापुना
तु॥वातःप्राणेनेशिरोमयोभूः॥द्यावापृथिवीपयसापयोभिः॥ऋतावरीयज्ञियेमापुनीतां॥बृहद्भिः॥स
वितस्त्रिभिः॥वर्षिष्ठैर्द्यूभिरृतुभिः॥अक्तोरक्षैःसुनाहिसायेनरोवाजसातये॥येनायोदीर्घमंकवः॥ततक्षिध्ये
नब्रह्मणा॥इदंब्रह्मपुनीमहे॥यःपावमानीरध्येति॥ऋषिभिःसंभृतंरसं॥सर्वंस्वंसंपूतमश्नाति॥स्वदितंमातरिश्वना॥आपावमानीर्योअध्येति॥ऋषिभिःसंभृतंरसं॥तस्मेसरस्वतीदुहे॥क्षीं
रंसर्पिर्मधूदकं॥पावमानीस्वस्त्ययनीः॥सुदुघाहिपयस्वतीः॥ऋषिभिःसंभृतोरसः॥ब्राह्मणेष्वमृत
ंहितं॥पावमानीर्दिशंतुनः॥इमंलोकमथोअमुंकामान्त्समर्धयंतुनः॥देवीर्दैवैः॥समाभृताः॥
पावमानीस्वस्त्ययनीः॥सुदुघाघृतश्चुतः॥ऋषिभिःसंभृतोरसः॥ब्राह्मणेष्वमृतंहितं॥येनदेवाः
पवित्रेण॥आत्मानंपुनतेसदा॥तेनसहस्रधारेण॥पावमान्यःपुनंतुमां॥प्राजापत्यंपवित्रंशा ४

हि॰

तोपावकःहिरण्ययं॥तेनब्रह्मविदोवयं॥पूतंब्रह्मपुनीमहे॥इदंब्रह्मपुनीतीसहमापुनातु॥सोमः
स्वस्वावरुणःसमीच्याधनोराजापवमानाभिःपुनातुमा॥जानवेदमृजयंतापुनातु॥भूर्भु
वःस्वः॥पुष्पकयाशतद्रुंकुरुनूग्रहीत्वापारकीटेनमस्तेरश्मन्यवृतिमिश्चिध्वंलिंगस्या
पवित्तारःस्तोहणंवाजिनमितिप्रतिरेसेवध्वारःस्तोहणंवाजिनमाजिघर्मिमित्रंप्रधिष्ठ
पवाहिशर्म॥शिशानोअग्निःक्रतुभिःसमिद्धःसनोदिवासरिषःपातुनक्तं॥सपूष्णवासमा
कुशंवंधमानाप्रजावतेहेउःदुत्तमंमितिजलाधिवासयति॥अवहोवरुणनोमोचिरवयज्ञे
मिरीमहेहविर्भिः॥क्षयन्नस्मभ्यमसुरप्रचेताराजन्नेनांसिशिश्रथः॥कृतानि॥उदुत्तमंवरुणा
मा॥इतिजलाधिवासः॥अथद्वितीयेलिंगनोभद्रंकलरेवतास्थापनंतस्यमतिर्घारंकलश
पूर्यस्थापयित्वाऋषिनोलिंगमुक्षापवेतुः॥इतिब्रह्मणस्तेजसेतिमंत्रेण॥वोधा

अद्यग्रंथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ यनपुण्याहंवाचयित्वा॥स्वागतंदेवदेवेशविश्वरूपनमोस्तुते॥शुद्धेपितृद्रधिष्ठानेशुद्धिंकुर्मःस
हस्रतः॥वल्मीकघटकषायशुद्धोदकेनक्षीरद्रधिघृतानांपल्वानिगायत्र्यागोमूत्रं॥गंधद्वारेतिगो
मयं॥आप्यायस्वेतिक्षीरं॥दधिक्राव्णइतिद्रधि॥तेजोसीत्याज्यं॥देवस्यत्वेतिकुशोदकं॥प्रणवेनालो
डनं॥ततःपंचगव्येन॥नमस्तेरुद्रमन्यवइत्यष्टभिः॥स्नापयित्वा॥शमीपलाशखदिरबिल्वाश्वत्थवि
कंकतन्यग्रोधपनसाम्रजंबूशिरीषोदुंबरप्लक्षाणांत्वक्कषायंकलशोदकेनाभिषिंचति॥अश्वत्थेवोनि
षदनमणिमुक्ताघटोदकंसुवर्णोदकेनाभिषिंचति॥हिरण्यवर्णइतिकुलशैरभिषिच्य॥अग्निः
सहितिमितिलोहदंडोत्तारणार्थंकेचिदाहुः॥पीठांतरेनिवेश्य॥अभिवस्त्रेतिवस्त्रयुग्मं॥अभिवस्त्रासु
६ वसनान्यर्षामिन्दोःसुदुघाःपयसानाः॥अभिचंद्रामनसेनोहिरण्याभ्यश्वान्त्सविनोदेवसोमः॥गंधाक्ष
तपुष्पधूपदीपनैवेद्यैःसंपूज्य॥आचार्यस्तेनसपात्रेस्थंमधुसुवर्णशलाकयागृहीत्वानेत्रोन्मीलनं

कुर्यात्॥नमोदेवेभ्यइत्यर्थं॥हिरण्यगर्भइत्यष्टभिर्दीपान्तरर्थं॥ॐहिरण्यगर्भःसमवर्तताग्रे
नि॰ध्रुव२यआत्मदाव॰ध्रुव३यस्येमेहि॰ध्रुव४॥येनद्यौरु॰ध्रुव५यंक्रंदसी॰ध्रुव६आपोहयद्बृहतीर्वि॰
ध्रुव७यश्चिदापोम॰ध्रुव८॥इतिदीपान्तरर्थंबलोत्थापयित्वा॥पश्चात्सुवर्णशलाकयाचित्रंदेवाना
मितिमंत्रेणस्वयंपार्श्वेस्थित्वासव्यंघोषंएकैकनेत्रंसव्योन्मीलयेत्॥ततश्चकश्चित्सुरतस्तिष्ठेत्॥ॐ
नमोभगवतेरुद्रायहिरण्यरेतसेपाशुपतायपरमात्मनेविश्वरूपायउमापतयेनमः॥इतिसंस्थिरत्य॥अंजंति
लेतिमधुंजनंकार्यं॥अंजंतित्वामधरेदेवंनोवनस्पतेमधुनाहव्येन॥यद्भूम्यस्तिष्ठाद्विणोहव्यंघृ
तंघोमानुरक्षास्माउपस्थे॥१॥नवाणलिंगेषितिकेचित्॥आचार्यंधेनुंदद्यात्॥ततःदेवंउत्थापयकु
शपत्रस्तनेषुनवरत्नेणाछादयंतिंप्रतिष्ठांतांरुद्रा॥ततश्चबलंधनंनामनमग्निंप्रतिष्ठाप्य॥अन्नाधायाश्च
प्रधानंश्रीरुद्रंधानद्रुःशिवतमाइत्यंतानुवाकेनहोमंअधस्तेनसहस्रावर्तीसनुवाकाभ्यांप्रत्यृचंआज्या

प्राक्शिरसंदेवंशापयेत्प्रायश्चित्तोमनुहूतोस्तइत्युक्त्वा ततःआचार्यःस्वस्तेपठेत्ना घ२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ हुनीहुत्वासर्वोवैरङ्इतिलिंगमूलंस्थोत्।।सर्वोवैरङ्स्वस्मैरङ्गायनमोअस्तु।।पुरुषोवैरङ्सन्मोनमः।।
पुनस्त्वाग्निर्हुत्वाकङुरायेतिमध्यं।।कङुरायप्रचेतसेक्रुष्टमायतव्यसे।।वोचेमशंतनंहृदे।।पुनस्त्वा
ग्निर्हुत्वाहिरण्यबाहवइत्यंस्थोत्।।सर्वोवैरङ्स्वस्मैरङ्गायनमोअस्तु।।पुरुषोवैरङ्सन्महोनमोनमः।।
पुनस्त्वाग्निर्हुत्वाकङुरायेतिमध्यं।।कङुरायप्रचेतसेमीक्रुष्टमायतव्यसे।।वोचेमशंतनंहृदे।।पुनस्त्वाग्नि
र्हुत्वाहिरण्यबाहवइत्यंस्थोत्।।पुनस्त्वाग्निर्हुत्वारङ्सपूर्वेनसेस्थोत्।।उदुत्यंजातवेदसमित्तिरेवज ४ मं ५
ष्पयसघोजातमित्तिपंचानुवाकेदेवालयंप्रविश्य।।मणिमुक्ताप्रवालसुवर्णरजतादीनूगर्भमध्ये
स्थापयित्वानमस्तेरङ्मन्यवइतिलिंगंस्थापयेत्।।अथगंधादीन्याउकाशोन्सुखानिकृत्वोत्थायआ
वाहनंकरोत्ति।।ॐभूःपुरुषमावाहयामि।।ॐभुवःपुरुषमावा०ॐस्वःपुरुषमावा०ॐभूर्भुवःस्वःपुरुष
मावाहयामि।।ततोदेवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांसरस्वत्यैवाचोयन्त्रेण ६
लिः।।इंरङ्वेरङ्भुवस्तिरोरङ्मुधारयाङ्मसिंरोअदीधरभुवंभुवेणरङ्विषा।।तस्मैसोमोअधिब्रवत्तस्मा
उब्रह्मणस्पतिः।।ध्रुवाद्यौर्ध्रुवापृथिवीध्रुवासः पर्वतारमे।।ध्रुवंविश्वमिदंजगद्ध्रुवोराजाविशामयं।।
ध्रुवंतेराजावरुणोध्रुवंदेवोबृहस्पतिः।।ध्रुवंतेइंद्रश्चाग्निश्चराष्ट्रंधारयतांध्रुवं।।ध्रुवंध्रुवेणरङ्विषाभिसो
मंरशामसि।।अथोनइंद्रोंः केवलीर्विशोबलिहृतस्करत्।।इतिजपित्वाप्रणवेनकृतांगन्यासः।।प्राणप्रति
ष्ठांकुर्यात्।। अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुमहेश्वराऋषयः।।ऋग्यजुःसामानिछंरांसि।।प्राण
शक्तिर्देवता।आंबीजं।क्रोंकीलकं।ह्रींसोः शक्तिः प्राणप्रतिष्ठापनेविनियोगः।।ततोमूलमुच्चार्य।।ॐ
अंकंखंगंघंङंरङ्धिव्यहृदयायनमोनाभ्यात्मनेआंअंगुष्ठाभ्यां।।ॐइंचंछंजंझंञंशङ्स्यशरीरस्यरूपधेंगंमनेइं
तर्जनीभ्यां।।ॐउंटंठंडंढंणंसाङ्रूपाणिपादयोरुपस्थात्मनेऐंअनामिकाभ्यां।।ॐओंपंफंबंभंमंवचनागम
विसर्गानंदात्मनेऔंकनिष्टिकाभ्यां।।ॐअंयंरंलंवंशंषंसंहंळक्षः।बुध्यहंकारचित्तात्मकात्मनेअः क

ॐहुंफट्ठंठंलंश्रोत्रत्वक्चक्षुर्घ्राणात्मने
ॐमध्यताभ्योनमः।२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नकरण्डाभ्यांनमः॥ एवंहृदयादि॥ अथध्यानं॥ रक्तौभोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकरैर्जै:पा
शंकोदंडमिक्षूद्भवमथगुणमपंचमंकुशंचाबिभ्राणास्रक्कपालंत्रिनयनलसिता पीनवक्षो
रुहाढ्यादेवीबालार्कवर्णाभवतुसुखकरीप्राणशक्ति:परामन:॥१॥इतिध्यात्वाजपेत्॥ॐआंह्रींक्रोंघरं
लंवंशंषंसंहंस:देवस्यहृदयाणा:॥ॐआंह्रींक्रोंघरं॰स:देवस्यशीर्षहस्थिन:॥ॐआंह्रींक्रोंघं॰स:देव
स्यसर्वेंद्रियाणिवाङ्मनअस्तु:श्रीत्रिपुराप्राणइहैवागत्यसुखंचिरंतिष्ठंतुस्वाहा॥ इतिसजीवंध्यात्वे
त्॥ यजमान:लिंगस्थरत्नपुष्पंकर्णेगायत्रींजपेत्॥स्वागतंदेवदेवेशमद्[illegible]याचलसिलागत:॥सान्निध्यंस
र्वदादेवस्वाचार्योपरिकल्पय॥१॥ततोरत्नांबुकलशेनाभिषिंचति॥प्रणवेनकूर्चासनंदत्वा॥दूर्वाविष्णुक्रां
ताश्यामाकपद्मपत्रकलशेनपाद्यं॥एलालवंगकर्पूरजातीफलमिश्रोदकेनाचमनं॥आपइशिरेकुशाग्रैःअ
क्षतैर्यवैस्तिलदूर्वांसिरघ्यं॥इमाआपःशिवतमाःपूतास्तनमामेध्यामेध्यतमाअमृतरसाःपार्वा

७

स्नाजुषतांप्रतिगृह्यतांप्रतिगृह्यतांभगवान्महादेवोरुद्रायवैनमोनमः॥स्नानपर्यंतंमंत्रावृत्तिः॥नमोस्तुनील
ग्रीवायेतिप्रतिसरंविसृजेत्॥नमस्कृत्यइमेगंधाःशुभादिव्याःसर्वगंधैरलंकृताः॥पूताब्रह्मपवित्रेणपू
ताःसूर्यस्यरश्मिभिः॥प्रतिगृह्यतांप्रतिगृह्यतु॥भगवान्महादेवोरुद्रायवैनमोनमः॥गंधं॥इमेमाल्याःशुभा
दिव्याःसर्वमाल्यैरलंकृताः॥पूताब्रह्मपवित्रेणपूताःसूर्यस्यरश्मिभिः॥प्रतिगृह्यतांप्र०॥नमः॥पुष्पाणि॥वन
स्पतिरसो०॥प्रतिगृह्यतांप्रति०॥नमः॥धूपं॥ज्योतिःशुक्रश्चतेजश्चदेवानासततप्रिया॥प्रभाकरमहातेजो
हरीधोयंप्रतिगृह्यतां॥प्रति०दीपं॥परमान्नेनगुडोदनेनआज्योदनेननानाभक्ष्योपहारादिनापवित्रंतेविततं
मिनैवेद्यं॥पवित्रंतेविततंब्रह्मस्पतेप्रभुर्गात्राणियर्पिविश्वतः॥अतप्ततनूर्नतदामोअश्नुतेश्रतासइद्वहन्त
स्तत्समाशत॥प्रतिगृह्यतांप्रति०नमः॥नैवेद्यं॥तांबूलं॥नीराजनं॥एभिःपुष्पांजलिं॥ॐभवायदेवायनमः॥१
ॐशर्वायदेवाय०२ईशानायदेवाय०३पशुपतयेदेवाय०४रुद्रायदेवायन०५उग्रायदेवाय०६भीमायदेवाय०७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महतेदेवायनमः॥८॥इतिपुष्पांजुलिंदत्वातैरेवतर्पयित्वा॥भवंरुद्रंशर्वंपशुपतिंउग्रंमहांतंभीमंईशानंमीढुष्टमंशिवंशंभुंमयोभवंरुद्रंमहादेवंउग्रंकुमारंसेनानिंप्रजापतिंहिरण्यबाहुंलोकपालंअंबिकापतिंगणपतिंदक्षाधिपतिंपशुपतिंभूतानांपतिंसर्वाशिवांतांमूर्तीःसर्वाभ्यो॥इतितिलोदनंहुत्वा॥भवस्यदेवस्यपत्न्यैनमःस्वाहा॥शर्वस्यदेवस्यपत्न्यैनमः॥ईशानस्यदेवस्यपत्न्यैपशुपतेर्देवस्यपत्न्यै॥रुद्रस्यदेवस्यपत्न्यै॥उग्रस्यदेवस्यपत्न्यै॥भीमस्यदेवपत्न्यैनमः॥महतःदेवस्यपत्न्यै॥इतितिलोदनं॥भवस्यदेवस्यसुतायनमःस्वाहा॥१॥इषुधिंहरिंहरंनं॥श्रीपिंहकीपिंएकीकृत्य॥ॐत्र्यंबकंय॰तानस्वाहा॥१॥मानोमहांतं१॥मानस्तोके१॥आराशेगोघ्नउतपूरुषघ्नेक्षयद्वीराय॰सुम्नमस्मेतेअस्तु॥रक्षाचनोअधिदेवब्रूयधाचनःशर्मयच्छद्विबर्हाःस्वाहा॥१॥विकिरिंविलोहितं॥सहस्राणिसहस्रशः॥१॥एभिर्हुतशिवायनमःस्वाहा१शंकराय॰१सहमा

नाय॰॥१॥शितिकंठाय॰॥१॥कपर्दिनेन॰॥१॥स्वाहाय॰॥१॥अरुणाय॰॥१॥अपगुरमाणाय॰॥१॥हिरण्यबाहवे॰१सप्तस्विंजराय॰१बभ्रुशाय॰१हिरण्यायनमःस्वाहा॥१॥इतिहुत्वाखिष्टकृताद्विहोमशेषंसमाप्य॥हविःशेषेणबलिः॥तत्रमंत्रः॥त्वामेकमाघंपुरुषपुराणंसर्वंशिवंविश्वसृजंयजामहेत्वमेवयज्ञोविहितोविधेयस्वामात्मनात्मन्यतिगृह्णीष्वहव्यं॥ॐभूर्भुवःस्वरोमितिशिरस्काबलिमुपहरेत्॥आचम्य॥अग्नेनयेतिमंत्रेणविश्वभुजेनमः॥सर्वभुजेनमः॥आत्मानेनमः॥परमात्मनेनमः॥इत्यग्निंनमस्कृत्य॥कृतस्यलिंगमनिष्टासिद्ध्यर्थंद्वादशब्राह्मणान्भोजयिष्ये॥देवंब्रह्मणिपत्नयार्थयेत्॥अहंचद्वादशब्राह्मैश्चसंहर्षंहरोरवं॥उमेशंवर्षंस्थंवस्यायायिसदाशिवं॥१॥मनवंदेदेवेशधर्मकामार्थसद्॥विद्याविद्येश्वरैरुद्रैर्गणेशेलोकपालकैः॥१॥देवदानवगंधर्वैर्विद्याधरमरुद्गणैः॥अस्मिन्लिंगेमहादेवसवरदोभवशंकर॥३॥स्वागतंदेवदेवेशभक्तानुग्रहकारक॥मामकृतज्ञंनमांदृष्ट्वालुब्धमनिपालय॥२॥धर्मार्थकाममसिद्ध्यर्थंस्थिरोभवसुप्रभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ यवः॥ सान्निध्यंचसदादेयस्त्वाचार्यो परिकल्पयेत्॥५॥ यावज्जंशयनीस्नपस्नानिष्ठंचयतिर्भवेत्॥ तावत्तद्यात्रयारंभे वेरास्थेयंभक्तानुकंपया॥६॥ भवेयुर्देवदेवेशसंविधेसर्वदेहिनां॥ येनरूपेणभगवान्नृत्तयात्राहंचराचरं॥७॥ तेनरूपेणदेवेशस्थेयमत्रगत्यते॥ इतिसंप्रार्थ्य॥ ततोनामकरणं॥ आचार्यदेवस्यउत्तरपूजाकृत्वा॥ कृतस्यलिंगप्रतिष्ठासांगतासिध्यर्थंआचार्यायगोनिष्क्रयभूतंदद्यात्तुसहस्रत्रये॥ अलाभेदशगोः॥ सरस्वत्यअस्त्रायफट्॥ लिंगघोरइतिमंत्रेणपूर्णकुंभंवाचयित्वामंत्रपदेवतांअस्मिंश्चविसर्जयेत्॥ यस्यस्मृत्याश्रुतिः॥ विष्णवेनमः॥३ इतिलिंगप्रतिष्ठापनविधिः॥ शुभंभवतु॥ अस्मिंनेवदिनेगोत्रासादाद्दूहिरण्यदक्षिणावलिदानं॥ नमस्तेरुद्रमन्यवेदिक्षुरुद्रमेषां॥ ॐआधाश्वकर्मन्नाग्नेयेयेचान्येदिक्षुसंस्थिताः॥ सस्तेनाःपरिचक्षाहितेभ्यैरुद्रंलिंगंबलिं॥९॥ २ रक्षेषुपर्वतायेषुयेविदिक्षुचसंस्थिताः॥ भूमौव्योम्निस्थितायेचतेभ्यैरुद्रंलिंगंबलिं॥२॥ इत्यष्टबलीन्दत्वानमेत्॥ इदंबलिदानंकृत्वा॥ प्रतिमालिंगवेदीनांयावंतःपरिमाणवः॥ तावद्वर्षसहस्राणिनृत्तभोगभुजः॥ ३

४० लं॥ इतिलिंगस्थापनविधिः॥ गंधाष्टकंनत्रिविधंशास्त्रेषुविभुश्रिवात्मकं॥ चंदनागरुकर्पूरगोरोचनकुंकुम रोचनाः॥ जटामांसीकुष्ठंचतुरःशस्त्रेगंधाष्टकंविदुः॥१॥ गोरोचनश्रीवेष्टकंविदुः॥ चंदनागरुश्रीवेर कुष्ठकुंकुमसेयकाः॥ जटयमांसीसुरभितिविश्लोगंधाष्टकंविदुः॥२॥ श्रीवेरसेवालं॥ चंदनागरुकर्पूरतमाल जलकुंकुमं॥ कुसीतकुष्ठसंयुक्तंशैवंगंधाष्टकंविदुः॥३॥ जलंमाल॥ कुसीतंरक्तचंदनं॥ इतिशारदायां॥ सकर्पूरंचंदनंचैवगोरोचनागरुसेचच॥ मदंमदगजकोद्भूतंकस्तूरीचंदनंसंयुतं॥ इतिगंधाष्टकं॥ सैकाति थिर्गौरपुनाकृत्तात्तशेशेगुरोर्भेभुविवह्निगासः॥ सोत्र्याधरोमेशलिपुत्रशेषेप्राणार्थनाशेभुखि हिविभूतलेच॥ श्रीमल्लाल्लारिमासेंद्रायनमः॥ लिखितमिदंरामनाथेन॥ श्रीपार्वतीपरमेश्वराभ्यांनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=17.09.19 10:52
,TRANSFERRED=2019/09/17 at 10:56:20
,PAGES=12
,TYPE=STD
,NAME=S0001865
,Book Name=M-652-LING PRATISHTHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection